# A-I/1/1302/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तर्कभाषाकारः केन बौद्धदर्शनप्रस्थानेन सम्बद्धः?
2. आचार्यमोक्षाकरगुप्तपादः केन महाविहारेण सम्बद्ध आसीत्?
3. बौद्धनये प्रमाणानि कति? तेषां नामानि लिखत।
4. अविसंवादनं किम्? पाठ्यग्रन्थदिशा लिखत।

**अथवा**

लिङ्गस्य नाम पर्यायाः के?

5. मीमांसकसम्मतप्रमाणनामानि लिखत।

**अथवा**

नैयायिकानां मते कति प्रमाणानि? नामानि लिखत।

6. स्वलक्षणं किम्?
7. प्रत्यक्षलक्षणं लिखत।
8. प्रत्यक्षप्रमाणस्य बौद्धदिशा भेदान् लिखत।
9. अनुमानस्य को विषयः? बौद्धदिशा संसूचयत।
10. अर्थापत्तिः का? कस्मिन् दर्शनसम्प्रदाये इयं स्वीक्रियते?

**अथवा**

अभावः कः? बौद्धदिशा लिखत।

11. शब्दप्रमाणं के स्वीकुर्वन्ति? बौद्धाः वैयाकरणा वा?
12. का नाम कल्पना?
13. योगिज्ञानं किम्?

**अथवा**

स्वसंवेदनं किम्? पाठ्यग्रन्थदिशा लिखत।

14. सामान्यं कतिविधम्? नामानि लिखत।

**अथवा**

अनुमानशब्दस्य निर्वचनं किम्?

15. समाख्या का?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थस्य कारिकामेकां विलिख्य तस्याः विवृतिं कुरुत।

17. सप्रसङ्गं व्याख्यात –

विज्ञानं जड़रूपेभ्यो व्यावृत्तमुपजायते। इयमेवात्मसंवित्तिरस्य याऽजड़रूपता॥

**अथवा**

कल्पितः कर्मकर्त्रादि परमार्थो न विद्यते। आत्मानमात्मनैवात्मा निहन्तीति निरुध्यते॥

18. प्रमाणफलव्यवस्था का? पाठ्यग्रन्थदिशा स्पष्टीकुरुत।

**अथवा**

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥"

–इत्यस्य शब्दप्रमाणस्य कथं खण्डनं कुर्वन्ति बौद्धाः? पाठ्यग्रन्थदिशा लिखत।

19. चार्वाकाभिमत – अनुमानाप्रमाण्यस्य निरसनं कथं कुर्वन्ति बौद्धाः? पाठ्यग्रन्थदिशा स्पष्टीकुरुत।

**अथवा**

अनुमानं किम्? बौद्धदिशा संसूचयत।

20. मीमांसकोपवर्णितम् उपमानप्रामाण्यं कथं खण्डयन्ति बौद्धाः?

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धनये मोक्षाकरगुप्तकृततर्कभाषायाः योगदानमवलम्ब्य निबन्धमेकं विशदीकुरुत।

**अथवा**

पाठ्यग्रन्थे पाठ्यांशस्य सारं लिखत।

**अथवा**

विविधासु तर्कभाषासु बौद्धतर्कभाषायाः वैशिष्ट्यं प्रदर्शयता निबन्धमेकम् उपनिबद्धीकुरुत।

# A-I/2/1303/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अभिधर्मकोशः त्रिपिटके संकलितः न वा?
2. लोकः भवार्णवेऽत्र कैः भ्रमति?
3. 'उपादानस्कन्धः' इत्यत्र 'उपादान' इत्यस्य पदस्य कोऽर्थः?

**अथवा**

कः पङ्कभूतः?

4. 'तस्मै नमस्कृत्य यथार्थशास्त्रे' इत्यत्र 'तस्मै' इत्यस्य पदस्य कोऽभिप्रायः?
5. षड् विज्ञानानि लिखत।
6. निरोधद्वयं लिखत।

**अथवा**

असंस्कृतं कतिविधम्?

7. वैभाषिकमतानुसारं चत्वारि महाभूतानि कानि?
8. पृथिवी लोकसंज्ञया किमुच्यते?

**अथवा**

अभिधर्मकोशे कति कोशस्थानानि?

9. अष्टादशधातुषु कति कामधात्वाप्ताः?
10. वेदनायाः लक्षणं किम्? कतिविधाश्च वेदनाः सन्ति?
11. के सास्रवाः धर्माः?

**अथवा**

'धर्म' पदस्य निर्वचनं लिखत।

12. सास्रवाः धर्माः कस्मात् दुःखम् इति कथ्यते?

13. अभिधर्मकोशः कस्य सम्प्रदायस्य ग्रन्थः ?

**अथवा**

कति बौद्धदर्शन-प्रस्थानानि ? कानि च तानि ?

14. प्रज्ञायाः लक्षणं भेदान् च लिखत।

15. धर्मायतने कानि सप्त द्रव्याणि विद्यन्ते ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. द्वादशायतनानि कानि ? विवृणुत।

**अथवा**

धर्मस्कन्धस्य प्रमाणं भेदाश्च कोशानुसारं लेख्याः।

17. धर्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः।
क्लेशैश्च भ्रमति भवार्णवेऽत्र लोकस्तद्धेतोरत उदितः किलैष शास्त्रा॥

-अस्याः कारिकायाः व्याख्यानं स्वाऽधीतग्रन्थदिशा क्रियताम्।

18. अभिधर्मकोशस्य मङ्गलाचरणं विलिख्य व्याख्येयम्।

19. विक्षिप्ताचित्तकस्यापि योऽनुबन्धः शुभाशुभः। महाभूतान्युपादय स ह्यविज्ञप्तिरुच्यते॥
-कारिकेयं यथाग्रन्थं व्याख्येया।

**अथवा**

अविज्ञप्तिः विवेचनीया।

20. पञ्च बाह्या द्विविज्ञेया नित्या धर्मा असंस्कृताः। धर्मार्धमिन्द्रियं ये च द्वादशाध्यामिकाः स्मृताः॥
-अस्याः कारिकायाः व्याख्यानं स्वाऽधीतग्रन्थदिशा क्रियताम्।

**अथवा**

धात्वर्थः कः ? कति धातवः ? के च ते ?

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. अभिधर्मकोशकर्तुः व्यक्तित्वं कृतित्वञ्च विलिख्य वैभाषिकदर्शनक्षेत्रे तस्यावदानं सम्यक्तया प्रतिपाद्यताम्।

**अथवा**

प्रथमकोशस्थानस्य विषयवस्तु किम् ? विवृणुत।

**अथवा**

अभिधर्मकोशस्य महात्म्यं विलिख्यताम्।

# A-I/3/1304/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. विज्ञप्तिमात्रतासिद्धिः कस्य बौद्धसम्प्रदायस्य ग्रन्थः?
2. आचार्यवसुबन्धोः अपरे ग्रन्थाः के? नामानि लिखत।
3. विंशतिकाप्रकरणस्य प्रथमकारिकां लिखत।
4. पाठ्यग्रन्थस्य स्वस्मृत्या एकां कारिकां लिखत या प्रश्नपत्रे नागता स्यात्।
5. विज्ञप्तिमात्रतासिद्धेः मुख्यं प्रतिपाद्यं किम्?
6. आचार्यवसुबन्धुः पूर्वकाले सर्वास्तिवादी आसीदिति सत्यम् असत्यं वा? लिखत।

**अथवा**

विज्ञप्तिमात्रतादिशा देशादिनियमः यथार्थः अयथार्थो वा? सूचयत।

7. आयतनानि कति? नामानि लिखत।
8. रूपादिस्कन्धाः के? नामानि लिखत।
9. चित्रस्य अपरपर्यायाः के? लिखत।
10. 'यदि विज्ञप्ति नार्थाः' इत्यस्य अभिप्रायं लिखत।
11. विज्ञानवादिनां मते परमाणुसिद्धिः सम्पद्यते न वा? पाठ्यग्रन्थदिशा उत्तरत।

**अथवा**

देशादिनियमः कीदृशः? विज्ञानवादिनां मते लिखत।

12. विज्ञप्तिमात्रतायाः बोधः धिया संभवति न वा? ग्रन्थदिशा लिखत।

**अथवा**

विज्ञानं कतिविधम्? नामानि लिखत।

13. नैरात्म्यं कतिविधम्? नामानि लिखत।

**अथवा**

पुद्गलनैरात्म्यं किम्?

14. आगमानुयायिविज्ञानवादिनां मते प्रत्यक्षप्रमाणं सिध्यति न वा? पाठ्यग्रन्थदिशा सूचयत।

**अथवा**

स्वप्नोपघातवत् कः नियमः सिद्धः? ग्रन्थदिशा उत्तरत।

15. आचार्यवसुबन्धुः आलयविज्ञानं स्वीकरोति न वा? सूचयत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य स्वस्मृत्या एकां कारिकां विलिख्य तस्या व्याख्या कार्या। या प्रश्नपत्रे नागता स्यात्।

17. सप्रसङ्गं व्याख्यात –

विज्ञप्तिमात्रमेवैतदसदर्थावभासनात्। यद्वत तैमिरिकस्यासत् केशोण्ड्रकादिदर्शनम्॥

**अथवा**

उक्तं यथा तदाभासा विज्ञप्तिः स्मरणं ततः। स्वप्ने दृग्विषयाभावं नाप्रबुद्धोऽवगच्छति॥

18. प्रसङ्गपूर्वकं व्याख्यात –

रूपाद्यायतनास्तित्वं तद्विनेयजनं प्रति। अभिप्रायवशादुक्तमुपपादुकसत्त्ववत्॥

**अथवा**

देशादिनियमः सिद्धः स्वप्नवत् प्रेतवत् पुनः। सन्तानानियमः सर्वैः पूयनद्यादिदर्शने॥

19. सम्यग्तया प्रसङ्गपूर्वकं व्याख्येयम् –

न तदेकं न चानेकं विषयः परमाणुशः। न च ते संहता यस्मात् परमाणुर्न सिध्यति॥

**अथवा**

विज्ञप्तिमात्रतासिद्धिः स्वशक्तिसदृशी मया। कृतेयं सर्वथा सा तु न चिन्त्या बुद्धगोचरः॥

20. सप्रसङ्गं व्याख्यात –

मरणं परविज्ञप्तिविशेषाद् विक्रिया यथा। स्मृतिलोपादिकान्येषां पिशाचादिमनोवशात्॥

**स. प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यवसुबन्धोः परिचयपूर्वकं तस्य दर्शनस्य वैशिष्ट्यं विशदीकुरुत।

**अथवा**

पाठ्यांशस्य सारमधिकृत्य निबन्धमेकम् उपनिबद्धीकुरुत।

**अथवा**

विज्ञप्तिमात्रतावादस्य समीक्षणं स्वकीयदृष्ट्या सम्यक्तया कुरुत।

# A-I/4/1305/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'मिलिन्दपञ्हो' इति ग्रन्थे कति परिच्छेदाः? प्रथमद्वितीयपरिच्छेदस्य नाम लिखत।

2. 'मिलिन्दपञ्हो' इति ग्रन्थे बाहिरकथायां कस्य बुद्धस्य उल्लेखः अस्ति?

**अथवा**

'को, भन्ते कस्सप, लोकं पालेती'ति। कस्य वचनमस्ति?

3. "दुब्बवचो वतायं सामणेरो"ति कस्य वचनमस्ति?

4. मिलिन्दः पूर्वजन्मनि कः आसीत्?

5. धम्मसङ्गणीप्पकरणं कस्य पिटकस्य भागोऽस्ति?

**अथवा**

को पटिसन्दहति? पाठ्यांशदिशा लिखत।

6. किं लक्खणो मनसिकारो? ग्रन्थदिशा लिखत।

**अथवा**

ऋद्धादिपञ्चेन्द्रियाणि ग्रन्थदिशा लिखत।

7. मिलिन्दः कस्य नगरस्य राजा आसीत्?

**अथवा**

'सङ्गहो-असङ्गहो'ति आदिना चुद्दसविधेन विमत्तं' कस्य ग्रन्थस्य विशेषता अस्ति?

8. अभिधम्मपिटके कति ग्रन्थाः? नामानि लिखत।

**अथवा**

मिलिन्दनागसेनयोः प्रथमसमागमः कुत्र जातः?

9. शीलस्य लक्षणं ग्रन्थदिशा लिखत।

10. प्रज्ञायाः किं लक्षणम्? पाठ्यग्रन्थदिशा लिखत।

11. वेदना कतिधा? नामानि लिखत।

12. "कतमं रूपं"इति? ग्रन्थदिशा सूचयत।

13. "कतमे कुसला धम्मा"ति? ग्रन्थदिशा लिखत।

14. 'फस्सो' इति शब्दस्य कोऽर्थः?

15. "किं लक्खणो विचारो"ति? ग्रन्थदिशा उत्तरत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. राज्ञ मिलिन्दस्य परिचयः संक्षेपेण लिखत।

17. मिलिन्दो नाम सो राजा. . . . . .इति मङ्गलपद्यं विलिख्य ससन्दर्भं व्याख्या विधेया।

**अथवा**

नागसेनस्य स्वाध्यायकालस्य वर्णनं पाठ्यग्रन्थदिशा कुरुत।

18. सप्रसङ्गव्याख्या कार्या –

गम्भीरपञ्ञो मेधावी, मग्गामग्गस्य कोविदो। उत्तमत्थं अनुप्पत्तो, नागसेनो विसादो॥

19. यथा हि अङ्गसम्भारा, होति सद्दो रथो इति। एवं खन्धेसु सन्तेसु, होति सत्तो ति सम्मुति"ति॥

–अस्या गाथायाः ससन्दर्भं व्याख्या विधेया।

**अथवा**

वस्सगणनपञ्हो (वर्षगणनाप्रश्नः) कः? प्रतिपादयत।

20. सप्रसङ्गं व्याख्येयम् –

निस्संसयं पराजयो, मम अज्ज भविस्सति। जयो च नागसेनस्य, यथा चित्तं न सण्ठितं ति॥

**अथवा**

सीललक्खणपञ्हो विवेचयत।

**स. प्रश्नः समाधेयः।** **(1×20=20)**

21. मिलिन्दस्य संवादशैलीमभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

'मिलिन्दपञ्हो' ग्रन्थस्य प्रथमपरिच्छेदस्य सारं लिखत।

**अथवा**

नागसेनस्य परिचयः देयः।